# Ribhuproktam Sadashivatvanirupanam

# ઋભુપ્રોક્તં સદાશિવત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Sadashivatvanirupanam

File name : RRibhuproktaMsadAshivatvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 26| 2-53||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સદાશિવત્વનિરૂપણમ્

(ઇદમેવ પરં બ્રહ્મ જ્ઞાનામૃતમનોમયમ્)
ન ભેદં ચ દ્વયં દ્વન્દ્વં ન ભેદં ભેદવર્જિતમ્ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનાશ્રયમનામયમ્ ॥ ૨૬.૨॥

ન ક્વચિન્નાત એવાહં નાક્ષરં ન પરાત્પરમ્ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનાશ્રયમનામયમ્ ॥ ૨૬.૩॥

ન બહિર્નાન્તરં નાહં ન સઙ્કલ્પો ન વિગ્રહઃ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનાશ્રયમનામયમ્ ॥ ૨૬.૪॥

ન સત્યં ચ પરિત્યજ્ય ન વાર્તા નાર્થદૂષણમ્ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનાશ્રયમનામયમ્ ॥ ૨૬.૫॥

ન ગુણો ગુણિવાક્યં વા ન મનોવૃત્તિનિશ્ચયઃ ।
ન જપં ન પરિચ્છિન્નં ન વ્યાપકમસત્ફલમ્ ॥ ૨૬.૬॥

ન ગુરુર્ન ચ શિષ્યો વા ન સ્થિરં ન શુભાશુભમ્ ।
નૈકરૂપં નાન્યરૂપં ન મોક્ષો ન ચ બન્ધકમ્ ॥ ૨૬.૭॥

અહં પદાર્થસ્તત્પદં વા નેન્દ્રિયં વિષયાદિકમ્ ।
ન સંશયં ન તુચ્છં વા ન નિશ્ચયં ન વા કૃતમ્ ॥ ૨૬.૮॥

ન શાન્તિરૂપમદ્વૈતં ન ચોર્ધ્વં ન ચ નીચકમ્ ।
ન લક્ષણં ન દુઃખાઙ્ગં ન સુખં ન ચ ચઞ્ચલમ્ ॥ ૨૬.૯॥

ન શરીરં ન લિઙ્ગં વા ન કારણમકારણમ્ ।
ન દુઃખં નાન્તિકં નાહં ન ગૂઢં ન પરં પદમ્ ॥ ૨૬.૧૦॥

ન સઞ્ચિતં ચ નાગામિ ન સત્યં ચ ત્વમાહકમ્ ।
નાજ્ઞાનં ન ચ વિજ્ઞાનં ન મૂઢો ન ચ વિજ્ઞવાન્ (વિવેકવાન્) ॥ ૨૬.૧૧॥

ન નીચં નરકં નાન્તં ન મુક્તિર્ન ચ પાવનમ્ ।

ન તૃષ્ણા ન ચ વિદ્યાત્વં નાહં તત્ત્વં ન દેવતા ॥ ૨૬.૧૨॥

ન શુભાશુભસઙ્કેતો ન મૃત્યુર્ન ચ જીવનમ્ ।
ન તૃપ્તિર્ન ચ ભોજ્યં વા ન ખણ્ડૈકરસોઽદ્વયમ્ ॥ ૨૬.૧૩॥

ન સઙ્કલ્પં ન પ્રપઞ્ચં ન જાગરણરાજકમ્ ।
ન કિઞ્ચિત્સમતાદોષો ન તુર્યગણના ભ્રમઃ ॥ ૨૬.૧૪॥

ન સર્વં સમલં નેષ્ટં ન નીતિર્ન ચ પૂજનમ્ ।
ન પ્રપઞ્ચં ન બહુના નાન્યભાષણસઙ્ગમઃ ॥ ૨૬.૧૫॥

ન સત્સઙ્ગમસત્સઙ્ગઃ ન બ્રહ્મ ન વિચારણમ્ ।
નાભ્યાસં ન ચ વક્તા ચ ન સ્નાનં ન ચ તીર્થકમ્ ॥ ૨૬.૧૬॥

ન પુણ્યં ન ચ વા પાપં ન ક્રિયા દોષકારણમ્ ।
ન ચાધ્યાત્મં નાધિભૂતં ન દૈવતમસમ્ભવમ્ ॥ ૨૬.૧૭॥

ન જન્મમરણે ક્વાપિ જાગ્રત્સ્વપ્નસુષુપ્તિકમ્ ।
ન ભૂલોકં ન પાતાલં ન જયાપજયાજયૌ ॥ ૨૬.૧૮॥

ન હીનં ન ચ વા ભીતિર્ન રતિર્ન મૃતિસ્ત્વરા ।
અચિન્ત્યં નાપરાધ્યાત્મા નિગમાગમવિભ્રમઃ ॥ ૨૬.૧૯॥

ન સાત્ત્વિકં રાજસં ચ ન તામસગુણાધિકમ્ ।
ન શૈવં ન ચ વેદાન્તં ન સ્વાદ્યં તન્ન માનસમ્ ॥ ૨૬.૨૦॥

ન બન્ધો ન ચ મોક્ષો વા ન વાક્યં ઐક્યલક્ષણમ્ ।
ન સ્ત્રીરૂપં ન પુમ્ભાવઃ ન ષણ્ડો ન સ્થિરઃ પદમ્ ॥ ૨૬.૨૧॥

ન ભૂષણં ન દૂષણં ન સ્તોત્રં ન સ્તુતિર્ન હિ ।
ન લૌકિકં વૈદિકં ન શાસ્ત્રં ન ચ શાસનમ્ ॥ ૨૬.૨૨॥

ન પાનં ન કૃશં નેદં ન મોદં ન મદામદમ્ ।
ન ભાવનમભાવો વા ન કુલં નામરૂપકમ્ ॥ ૨૬.૨૩॥

નોત્કૃષ્ટં ચ નિકૃષ્ટં ચ ન શ્રેયોઽશ્રેય એવ હિ ।
નિર્મલત્વં મલોત્સર્ગો ન જીવો ન મનોદમઃ ॥ ૨૬.૨૪॥

ન શાન્તિકલના નાગં ન શાન્તિર્ન શમો દમઃ ।
ન ક્રીડા ન ચ ભાવાઙ્ગં ન વિકારં ન દોષકમ્ ॥ ૨૬.૨૫॥

ન યત્કિઞ્ચિન્ન યત્રાહં ન માયાખ્યા ન માયિકા ।
યત્કિઞ્ચિન્ન ચ ધર્માદિ ન ધર્મપરિપીડનમ્ ॥ ૨૬.૨૬॥

ન યૌવનં ન બાલ્યં વા ન જરામરણાદિકમ્ ।
ન બન્ધુર્ન ચ વાઽબન્ધુર્ન મિત્રં ન ચ સોદરઃ ॥ ૨૬.૨૭॥

નાપિ સર્વં ન ચાકિઞ્ચિન્ન વિરિઞ્ચો ન કેશવઃ ।
ન શિવો નાષ્ટદિક્પાલો ન વિશ્વો ન ચ તૈજસઃ ॥ ૨૬.૨૮॥

ન પ્રાજ્ઞો હિ ન તુર્યો વા ન બ્રહ્મક્ષત્રવિડ્રૂઃ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનામૃતમનામયમ્ ॥ ૨૬.૨૯॥

ન પુનર્ભાવિ પશ્ચાદ્વા ન પુનર્ભવસમ્ભવઃ ।
ન કાલકલના નાહં ન સમ્ભાષણકારણમ્ ॥ ૨૬.૩૦॥

ન ચોર્ધ્વમન્તઃકરણં ન ચ ચિન્માત્રભાષણમ્ ।
ન બ્રહ્માહમિતિ દ્વૈતં ન ચિન્માત્રમિતિ દ્વયમ્ ॥ ૨૬.૩૧॥

નાન્નકોશં ન ચ પ્રાણમનોમયમકોશકમ્ ।
ન વિજ્ઞાનમયઃ કોશઃ ન ચાનન્દમયઃ પૃથક્ ॥ ૨૬.૩૨॥

ન બોધરૂપં બોધ્યં વા બોધકં નાત્ર યદ્ભ્રમઃ ।
ન બાધ્યં બાધકં મિથ્યા ત્રિપુટીજ્ઞાનનિર્ણયઃ ॥ ૨૬.૩૩॥

ન પ્રમાતા પ્રમાણં વા ન પ્રમેયં ફલોદયમ્ ।
ઇદમેવ પરં બ્રહ્મ જ્ઞાનામૃતમનોમયમ્ ॥ ૨૬.૩૪॥

ન ગુહ્યં ન પ્રકાશં વા ન મહત્વં ન ચાણુતા ।
ન પ્રપઞ્ચો વિદ્યમાનં ન પ્રપઞ્ચઃ કદાચન ॥ ૨૬.૩૫॥

નાન્તઃકરણસંસારો ન મનો જગતાં ભ્રમઃ ।
ન ચિત્તરૂપસંસારો બુદ્ધિપૂર્વં પ્રપઞ્ચકમ્ ॥ ૨૬.૩૬॥

ન જીવરૂપસંસારો વાસનારૂપસંસૃતિઃ ।
ન લિઙ્ગભેદસંસારો નાજ્ઞાનમયસંસ્મૃતિઃ (સંસૃતિઃ) ॥ ૨૬.૩૭॥

ન વેદરૂપસંસારો ન શાસ્ત્રાગમસંસૃતિઃ ।
નાન્યદસ્તીતિ સંસારમન્યદસ્તીતિ ભેદકમ્ ॥ ૨૬.૩૮॥

ન ભેદાભેદકલનં ન દોષાદોષકલ્પનમ્ ।
ન શાન્તાશાન્તસંસારં ન ગુણાગુણસંસૃતિઃ ॥ ૨૬.૩૯॥

ન સ્ત્રીલિઙ્ગં ન પુંલિઙ્ગં ન નપુંસકસંસૃતિઃ ।
ન સ્થાવરં ન જઙ્ગમં ચ ન દુઃખં ન સુખં ક્વચિત્ ॥ ૨૬.૪૦॥

ન શિષ્ટાશિષ્ટરૂપં વા ન યોગ્યાયોગ્યનિશ્ચયઃ ।
ન દ્વૈતવૃત્તિરૂપં વા સાક્ષિવૃત્તિત્વલક્ષણમ્ ॥ ૨૬.૪૧॥

અખણ્ડાકારવૃત્તિત્વમખણ્ડૈકરસં સુખમ્ ।
દેહોઽહમિતિ યા વૃત્તિર્બ્રહ્માહમિતિ શબ્દકમ્ ॥ ૨૬.૪૨॥

અખણ્ડનિશ્ચયા વૃત્તિર્નાખણ્ડૈકરસં મહત્ ।
ન સર્વવૃત્તિભવનં સર્વવૃત્તિવિનાશકમ્ ॥ ૨૬.૪૩॥

સર્વવૃત્ત્યનુસન્ધાનં સર્વવૃત્તિવિમોચનમ્ ।
સર્વવૃત્તિવિનાશાન્તં સર્વવૃત્તિવિશૂન્યકમ્ ॥ ૨૬.૪૪॥

ન સર્વવૃત્તિસાહસ્રં ક્ષણક્ષણવિનાશનમ્ ।
ન સર્વવૃત્તિસાક્ષિત્વં ન ચ બ્રહ્માત્મભાવનમ્ ॥ ૨૬.૪૫॥

ન જગન્ન મનો નાન્તો ન કાર્યકલનં ક્વચિત્ ।
ન દૂષણં ભૂષણં વા ન નિરઙ્કુશલક્ષણમ્ ॥ ૨૬.૪૬॥

ન ચ ધર્માત્મનો લિઙ્ગં ગુણશાલિત્વલક્ષણમ્ ।
ન સમાધિકલિઙ્ગં વા ન પ્રારબ્ધં પ્રબન્ધકમ્ ॥ ૨૬.૪૭॥

બ્રહ્મવિત્તં આત્મસત્યો ન પરઃ સ્વપ્નલક્ષણમ્ ।
(ન બ્રહ્મચિત્ત આત્મન્યો ન પરઃ સ્વપ્નલક્ષણમ્ ।)
ન ચ વર્યપરો રોધો વરિષ્ઠો નાર્થતત્પરઃ ॥ ૨૬.૪૮॥

આત્મજ્ઞાનવિહીનો યો મહાપાતકિરેવ સઃ ।
એતાવજ્જ્ઞાનહીનો યો મહારોગી સ એવ હિ ॥ ૨૬.૪૯॥

અહં બ્રહ્મ ન સન્દેહ અખણ્ડૈકરસાત્મકઃ ।
બ્રહ્મૈવ સર્વમેવેતિ નિશ્ચયાનુભવાત્મકઃ ॥ ૨૬.૫૦॥

સદ્યો મુક્તો ન સન્દેહઃ સદ્યઃ પ્રજ્ઞાનવિગ્રહઃ ।
સ એવ જ્ઞાનવાઁલ્લોકે સ એવ પરમેશ્વરઃ ॥ ૨૬.૫૧॥

ઇદમેવ પરં બ્રહ્મ જ્ઞાનામૃતમનોમયમ્ ।
એતત્પ્રકરણં યસ્તુ શ‍ૃણુતે બ્રહ્મ એવ સઃ ॥ ૨૬.૫૨॥

એકત્વં ન બહુત્વમપ્યણુમહત્કાર્યં ન વૈ કારણં
    વિશ્વં વિશ્વપતિત્વમપ્યરસકં નો ગન્ધરૂપં સદા ।
બદ્ધં મુક્તમનુત્તમોત્તમમહાનન્દૈકમોદં સદા
    ભૂમાનન્દસદાશિવં જનિજરારોગાદ્યસઙ્ગં મહઃ ॥ ૨૬.૫૩ ॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં સદાશિવત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૨૬। ૨-૫૩ ॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 26. 2-53..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.

Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

---

*Ribhuproktam Sadashivatvanirupanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*